"छागजागरणं कार्य्यं खड्गो धार्य्यः समीपतः ।
आवाह्य पूजयेद्देवीं गणेशं मातरं गिरिम् ॥"
देवीं षष्ठीम् । गिरिं मन्थानदण्डम् ॥*॥ मातृनामान्याह । वह्निगृह्यपरिशिष्टम् ।
"गौरी पद्मा शची मेधा सावित्री विजया जया
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह ।
आदौ विनायकः पूज्यो अन्ते च कुलदेवताः ॥"
ताश्चाभिधाय भविष्ये ।
"पूज्याश्चित्रेऽथवा कार्य्या वरदाभयपाणयः ।"
मातरः इति सर्व्वासां विशेषणम् । अतएव गौर्य्यै मात्रे नमः । इत्यादिप्रयोगः । एता मातरो लोकमातरो ज्ञेयाः अतएव तयोर्ब्बहुत्वेन निर्द्देशः ॥*॥ गणेशपूजायां प्रार्थनामन्त्रो यथा,
"सर्व्वविघ्नहरो देव एकदन्तो गजाननः ।
षष्ठीगृहेऽर्च्चितः प्रीत्या शिशुं दीर्घायुषं कुरु ॥"
ततः ।
"आयाहि वरदे देवि महाषष्ठीति विश्रुता ।
शक्तिरूपेण मे पुत्त्रं रक्ष जागरवासरे ॥"
इति षष्ठ्या आवाहनम् । ततः षष्ठीं पूजयेत् ।
"गौर्य्याः पुत्त्रो यथा स्कन्दः सदा संरक्षितस्त्वया
तथा ममाप्ययं बालो रक्ष्यतां षष्ठि ते नमः ॥"
इति त्रिः पूजयेदिति । भोजराजः ।
"गणेशश्चैव नन्दा च पूतना मुखमण्डिका ।
विवानिका शकुनिका शुष्कनन्दा च जम्भिका ॥
आचार्य्यिका रेवती च पिलिपिच्छा ततः परम् ।
स्कन्दा च द्वादशैतेऽर्च्याः रक्षार्थं मातृकाग्रहाः ॥"
कृत्यचिन्तामणौ स्तुतिः ।
"जय देवि जगन्मातर्जगदानन्दकारिणि ।
प्रसीद मम कल्याणि नमोऽस्तु षष्ठि देवि ते ॥"
वरप्रार्थनम् ।
"रूपं देहि यशो देहि भाग्यं भगवति देहि मे ।
पुत्त्रान्देहि धनं देहि सर्व्वान् कामांश्च देहि मे ॥
धात्री त्वं कार्त्तिकेयस्य महाषष्ठीति विश्रुता ।
त्वत्प्रसादादविघ्नेन चिरं जीवतु बालकः ॥
देवतानामृषीणाञ्च सर्व्वेषां हितकारिणि ।
समर्पितं रक्ष पुत्त्रं महाषष्ठि नमोऽस्तु ते ॥
इत्यनेन बालं व्यजनस्थं कृत्वा समर्पयेत् ॥"
मन्थानदण्डं पूजयेत् ।
"मन्थानमन्दरोऽसि त्वं मथितः सागरस्त्वया ।
तथा ममापि पुत्त्रस्य मन्थ विघ्नं नमोऽस्तु ते ॥"
ततः षट्कृत्तिकाः पूजयेत् । ताश्च ।
"शिवा सम्भूतिनाम्नी च कीर्त्तिः सन्ततिरेव च ।
अनसूया क्षमा चैव षडेताः कृत्तिकाः स्मृताः ॥"
मार्कण्डेयपुराणम् ।
"अन्यस्य पशुशून्ये च निर्यूपे सूतिकागृहे ।
अदीपशस्त्रमूषले भूतिसर्षपवर्जिते ।
अनुप्रविश्य या जातमपहृत्यात्मसम्भवम् ।
क्षणप्रसविनी बालं तत्रैवोत्सृज्यति द्विज ॥
सा जातहारिणी नाम सुघोरा पिशिताशना ।
तस्मात् संरक्षणं कार्य्यं यत्नतः सूतिकागृहे ॥"
यूपो बद्धच्छागस्तम्भः । पशुः छागः । छागजागरणं कार्य्यमित्येकवाक्यत्वात् ॥*॥ पाद्मे ।
"पायसं सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति ।
गृहं तस्य न रक्षांसि धर्षयन्ति कदाचन ॥"
इति ज्योतिस्तत्त्वम् ॥
अन्यत् षष्ठीशब्दे द्रष्टव्यम् ॥

सूतिगृहं, क्ली, (सूत्याः प्रसवस्य गृहम् ।) प्रसवगृहम् । इति शब्दरत्नावली ॥

सूतिमासः, पुं, (सूतेः प्रसवस्य मासः । ) प्रसवमासः । तत्पर्य्यायः । वैजननः २ । इत्यमरः । २ । ६ । ३९ ।
"सूतिमासो वैजननो नवमो दशमोऽपि च ।"
इति जटाधरः ॥

सूतीगृहं, क्ली, (सूत्याः गृहम् ।) प्रसवागारः । इति शब्दरत्नावली ॥ (यथा, भागवते । १० । ८५ । २० ।
सूतीगृहे ननु जगाद भवानजो नौ
संजज्ञ इत्यनुयुगं निजधर्म्मगुप्त्यै ॥")

सूत्कारः, पुं, (सूत् इति शब्दस्य कारः करणम् ।) अनुकरणशब्दविशेषः । सूत् इति शब्दं करोति । यथा, सीत्कारादिः ॥

सूत्थानः, त्रि, (सुष्ठु उत्थानं उद्योगो यस्य । ) चतुरः । इत्यमरः ॥ सुन्दरोत्थाने, क्ली ॥

सूत्यरं, क्ली, सुरासन्धानम् । इति शब्दचन्द्रिका ॥

सूत्या, स्त्री (सू + क्यप् । निपातनात् साधुः ।) यज्ञस्नानम् । तत्पर्य्यायः । अभिषवः २ सवनम् ३ । इत्यमरः ॥ सोमलतारसपानम् । इति भरतः ॥

सूत्याशौचं, क्ली, (सूतिनिमित्तकमाशौचम् । ) जननाशौचम् । यथा,—
"दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः ।
शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते ॥"
इति शुद्धितत्त्वम् ॥

सूत्र, त् क ग्रन्थने । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-सक०-सेट् ।) दीर्घी दन्त्यवर्गाद्यमध्यः । वेष्टने इत्यन्ये । सूत्रयति सूत्रापयति सूत्रेण हस्तं लोकः । इति दुर्गादासः ॥

सूत्रं, क्ली, (सूत्र्यतेऽनेनेति । सूत्रम् क ग्रन्थने + णिच् + "एरच् ।" इत्यच् । यद्वा षिव्यु तन्तुसन्ताने + "सिविमुच्योष्टेरू च ।" उणा० ४ । १६२ । इति ष्ट्रन् । टेरू च ।) वस्त्रारम्भकम् । सूता इति भाषा । तत्पर्य्यायः । तन्तुः २ । इत्यमरजटाधरौ ॥ सूत्रतन्तुः ३ । इति भरतधृतहारावली ॥ (यथा, रघुः । १ । ४ ।
"अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्व्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥"
यज्ञसूत्रम् । यथा, महानिर्व्वाणे । १ । ४८ ।
"ब्राह्मण्यचिह्नमेतावत् केवलं सूत्रधारणम् ॥")
व्यवस्था । शास्त्रादिसूचनाग्रन्थः । इति मेदिनी ॥
सूत्रलक्षणं यथा,—
"स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥"
इति मुग्धबोधटीकायां दुर्गादासः ॥
(कारणम् । निमित्तम् । यथा, भागवते । ४ । ६ । ४३ ।
त्वमेव धर्म्मार्थदुघाभिपत्तये
दक्षेण सूत्रेण ससर्ज्जिथाध्वरम् ॥")

सूत्रकण्ठः, पुं, ( सूत्रं कण्ठे यस्य । ) विप्रः । खञ्जरीटः । कपोतः । इति मेदिनी ॥

सूत्रकोणः, पुं, (सूत्रबद्धः कोणो यस्य ।) डमरुः । इति हारावली ॥

सूत्रकोणकः, पुं, (सूत्रकोण एव । स्वार्थे कन् ।) डमरुः । इति त्रिकाण्डशेषः ॥

सूत्रगण्डिका, स्त्री, (सूत्रं गण्डयतीति । गण्ड + ण्वुल् ।) तन्त्रवायोपकरणविशेषः । तत्पर्य्यायः । एषणी २ । इति शब्दरत्नमाला ॥

सूत्रतन्तुः, पुं, (सूत्रमेव तन्तुः । ) सूत्रम् । इति हारावली ॥

सूत्रतर्कुटी, स्त्री, ( सूत्रस्य तर्कुटी । ) तर्कुटी । इति जटाधरः ॥ टेको इति भाषा ॥

सूत्रधरः, पुं, ( धरतीति । धृ + अच् । सूत्रस्य धरः ।) सूत्रधारः । इति केचित् ॥

सूत्रधारः, पुं, (सूत्रं धरति धारयति वा । धृ + णिच् वा + अण् ।) शचीपतिः । इन्द्रः । नान्द्यन्तरसञ्चारी । स तु रङ्गभूमिं परिक्रम्य नाटकीयकथासूत्रसूचकः । (यथा, साहित्यदर्पणे । ६ । २८३ ।
"पूर्व्वरङ्गं विधायैव सूत्रधारो निवर्त्तते ।
प्रविश्य स्थापकस्तद्वत् काव्यमास्थापयेत्ततः ॥")
शिल्पिप्रभेदः । कुतार इति भाषा । इति मेदिनी ॥ स च शूद्रागर्भे विश्वकर्म्मण औरसेन जातः । इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

सूत्रपुष्पः, पुं, (सूत्रार्थं पुष्पमस्य ।) कार्पासः । इति त्रिकाण्डशेषः ॥

सूत्रवीणा, स्त्री, ( सूत्रबद्धा वीणा । ) वीणाभेदः । तत्पर्य्यायः । लावुकी २ । इति हारावली ॥

सूत्रभित्, } पुं, (सूत्रं भिनत्तीति । भिद् + क्विप् ।)
सूत्रभिद्, } सौचिकः । इति शब्दरत्नावली ॥

सूत्रमध्यभूः, पुं, (सूत्रमध्यवत् भूरुत्पत्तिर्यस्य । ) यक्षधूपः । इति शब्दचन्द्रिका ॥

सूत्रयन्त्रं, क्ली (सूत्रस्य यन्त्रम् ।) सूत्रवेष्टनकाष्ठम् । ताँत इति भाषा । यथा,—
"आवापनं सूत्रयन्त्रं यत्सूत्रैरभिवेष्टते ॥"
इति शब्दमाला ॥

सूत्रला, स्त्री, ( सूत्रं लातीति । ला + कः । ) तर्कुटी । इति हारावली ॥

सूत्रवेष्टनं, क्ली, (वेष्ट्यतेऽनेनेति । वेष्ट + करणे ल्युट् । सूत्रस्य वेष्टनम् । तन्त्रवायोपकरणम् । तासनी इति भाषा । तत्पर्य्यायः । त्रसरः २ । इत्यमरः । ३ । २ । २४ ॥ तसरः ३ । इति भरतः ॥